## तेन प्रोक्तम् । (१०१/१४८१)

तेन इति तृतीयासमर्थात् प्रोक्तम् [1]इत्यस्मिन्नर्थे यथाविहितं प्रत्ययो भवति । प्रकर्षेणोक्तं प्रोक्तमित्युच्यते, न तु कृतम्, 'कृते ग्रन्थे' (४.३.११६/१४९६) इत्यनेन [2]गतार्थत्वात् । अन्येन कृता [3]माथुरेण प्रोक्ता [4]माथुरी वृत्तिः । पाणिनीयम् । आपिशलम् । काशकृत्स्नम् ॥

## तित्तिरिवरतन्तुखण्डिकोखाच्छण् । (१०२/१४८२)

तित्तिर्यादिभ्यः शब्देभ्यः छण् प्रत्ययो भवति तेन प्रोक्तम् इत्येतस्मिन् विषये । अणोऽपवादः । तित्तिरिणा प्रोक्तमधीयते तैत्तिरीयाः । वारतन्तवीयाः । खाण्डिकीयाः । [5]औखीयाः । छन्दसि चायमिष्यते । तित्तिरिणा प्रोक्तः श्लोकः इत्यत्र न भवति । 'शौनकादिभ्यश्छन्दसि' (४.३.१०६/१४८६) [6]इत्यत्रास्यानुवृत्तेः छन्दोऽधिकारविहितानां च [7]तद्विषयता इष्यते ॥

## काश्यपकौशिकाभ्यामृषिभ्यां णिनिः । (१०३/१४८३)

[8]काश्यपकौशिकाभ्याम् [9]ऋषिभ्यां णिनिः प्रत्ययो भवति तेन प्रोक्तम् इत्येतस्मिन् विषये । छस्यापवादः । णकार उत्तरत्र वृद्ध्यर्थः । [10]कल्पस्ताभ्यां प्रोक्तः इति स्मर्यते । [11]तस्यापि तद्विषयता भवत्येव । 'शौनकादिभ्यश्छन्दसि' (४.३.१०६/१४८६) [12]इत्यत्रानुवृत्तेः छन्दोऽधिकारविहितानां च तत्र तद्विषयता इष्यते । काश्यपेन प्रोक्तं कल्पमधीयते काश्यपिनः । कौशिकिनः । ऋषिभ्याम् इति किम्? इदानींतनेन गोत्रकाश्यपेन प्रोक्तं काश्यपीयम् ॥

## कलापिवैशम्पायनान्तेवासिभ्यश्च । (१०४/१४८४)

कलाप्यन्तेवासिनां वैशम्पायनान्तेवासिनां च ये वाचकाः शब्दास्तेभ्यो णिनिः प्रत्ययो भवति तेन प्रोक्तम् इत्येतस्मिन् विषये । अणोऽपवादः । छं तु परत्वाद् बाधते । तत्र कलाप्यन्तेवासिनश्चत्वारः – हरिद्रुः, [13]छगली, तुम्बुरुः, [14]उलपः इति । वैशम्पायनान्तेवासिनः नव – [15]आलम्बिः, [16]पलङ्गः, कमलः, [17]ऋचाभः, आरुणिः, [18]ताण्ड्यः, श्यामायनः, कठः, कलापी इति । प्रत्यक्षकारिणो गृह्यन्ते न तु व्यवहिताः [19]शिष्यशिष्याः । कुतः ? [20]कलापिखाण्डायनग्रहणात् । तथाहि वैशम्पायनान्तेवासी [21]कलापी, तदन्तेवासिनो [22]वैशम्पायनान्तेवासिन एव भवन्ति, किं कलापिग्रहणेन ? तथा वैशम्पायनान्तेवासी कठस्तदन्तेवासी [23]खाण्डायनः, तस्य किं शौनकादिषु पाठेन ? तदेतत् प्रत्यक्षकारिग्रहणस्य लिङ्गम् । कलाप्यन्तेवासिभ्यः तावत् – हरिद्रुणा प्रोक्तमधीयते हारिद्रविणः । तौम्बुरविणः । औलपिनः । छगलिनः ढिनुकं वक्ष्यति । वैशम्पायनान्तेवासिभ्यः – आलम्बिनः । [24]पालङ्गिनः । [25]कामलिनः । [26]आर्चाभिनः । [27]आरुणिनः । [28]ताण्डिनः । श्यामायनिनः । कठाल्लुकं वक्ष्यति (४.३.१०७/१४८७), कलापिनश्चाणम् (४.३.१०८/१४८८) ।

---

1. इत्येतस्मिन्नर्थे ब.क.इ. 2. एव सिद्धत्वात् फ, गतत्वात् अ.ब.ड.ग. 3. माधुरेण ड. 4. माधुरी
ड. 5. औदवीयाः ब. 6. इत्येतदनुवर्तयितव्यम् इत्याहुः ब.ड.इ.फ. 7. तद्विषये नेच्छते क. 8. काश्यपकौ–
शिकशब्दाभ्याम् ब. 9. ऋषिवाचिभ्याम् ब.क. 10. कल्प्यः अ.ड.इ.फ. 11. तस्मादपि ब. 12. इत्यनुवर्तते
फ. 13. छगला ब. 14. हलय ब. 15. आलम्बः क.ड, अलम्ब इ. 16. फलिंग ड.ह. 17. ऋचाहः ह.
18. ताण्डिः ड, काण्डयः ह. 19. शिष्याः फ, शिष्यप्रशिष्यादयः ह. 20. कलापिग्रहणात् फ. 21. कलापः
ब. 22. अपि इत्यधिकम् फ. 23. खाडायनः अ.क.फ. 24. फालङ्गिनः ड, नास्ति ह. 25. कालालिनः
क. 26. नास्ति ह. 27. आहिनः इत्यधिकम् ह. 28. काण्डिन ह.